# संस्कृत वार्ता:

दिनाङ्क : 11/04/2026 सायम् - 06:20

## आदौ मुख्यवार्ता:

- पश्चिम-एशियायां स्थायि-शान्ति-सन्धये अमेरिका-ईरानयो: मध्ये वार्ता जायते।
- प्रधानमन्त्री नरेन्द्र मोदी प्रोक्तं यत्-शरणार्थिन: पूर्ण-संवैधानिक-अधिकारा: प्राप्स्यन्ति, अवैध नागरिका: बहि: निष्कासयिष्यन्ति।
- राष्ट्रपतिना, उपराष्ट्रपतिना, प्रधानमन्त्रिणा च समाज-सुधारक-महात्मा-ज्योतिबा-फुले जयन्त्यां श्रद्धाञ्जलि: समर्पिता:।
- दिल्ल्यां पञ्जीकृत त्रिंशत् लक्ष-रुप्यकात्मक विद्युत्-कारयानानि त्रिंशदुत्तर-द्विसहस्रतम वर्षंयावत् मार्ग-कर-पञ्जीकरण-शुल्कं निश्शुल्कं जातम्।
- भारते डिजिटल देय प्रक्रियाया: दश-वर्षाणि प्रपूरितानि।
- आयुष शेट्टी एशिया-बैडमिंटन प्रतिस्पर्धाया: निर्णायक द्वन्द्वे प्रविष्टा:।

---

## अमेरिका-ईरान वार्ता

पश्चिम-एशियायां स्थायि-शान्त्यर्थं अद्य पाकिस्तानीय राजधान्यां इस्लामाबादे अमेरिका-ईरानयो: मध्ये संवादे प्रचलति। अमेरिकाया: उपराष्ट्रपते: जे.डी. वेंस वर्धस्य नेतृत्वे अमेरिकी-दलमेकं इस्लामाबादे एव स्थितमस्ति। भारत देशे अमेरिकी राजदूतने सर्जियो गोड़वर्येन प्रोक्तं यत् अमेरिका देशस्य ऊर्जा मन्त्रिण: क्रिस-राइट इत्येतस्य वार्तालापं विदेश-सचिवेन विक्रम-मिसरी-महाभागेन साकं सफलं जातम्। उपवेशनमिदं शांति-विधेयक: भारते पारित-करण-दिशिं आलक्ष्य सम्पन्नम्। विधेयकस्य उद्देश्यं भारते परमाणूर्जा संरचनाया: आधुनिकीकरणं, सुरक्षा मानकनां सन्धारणम् अन्ताराष्ट्रिय सहयोगिताया: अवसराणि सृजनमस्ति। श्रीगौरेण प्रोक्तं यत् अमेरिकादेश: भारतेन साकं असैन्य-परमाणूर्जां समेत्य ऊर्जा-सुरक्षाया: अन्नेषु क्षेत्रेषु अपि सहयोग-विवर्धयितुं समीहते। विदेश-सचिवं विक्रम-मिसरी श्‍व: प्रभृति त्रि-दिवसीय यात्रायै फ्रांस-जर्मनी देशौ प्रति गच्छति। तत्रासौ फ्रांस-देशीय-विदेश-मन्त्रालयस्य महासचिवेन मार्टिन-क्रिएन्सेन समं भारत-फ्रांस विदेश-कार्यालय ईरानदेशस्य पक्षत: संसदीय-अध्यक्ष: मोहम्मद–

बाघेर: ग़ालिबाफ-प्रतिनिधित्वम् करोति। असौ सामाजिक- माध्यमेन उक्तवान् यत् उभयौ: पक्षयो: मध्ये स्वीकृता: केचन् उपाया: अद्यापि न कार्यान्विता: सन्ति। येषु लेबनान-देशे युद्धविराम: तया ईरानस्य अवरुद्ध-सम्पत्तीनां विमोचनं समाविष्टं अस्ति। एषा वार्ता मुख्यतया ईरानस्य परमाणु-कार्यक्रम:, बैलिस्टिक-प्रक्षेपास्त्र–विकास: तथा होर्मुज़ संकटमार्गम् इत्यादिषु विषयेषु केन्द्रिता भविष्यति।

-----------------------------------------------

<u>प्रधानमन्त्री-पश्चिमबंगाल कटवा</u>

प्रधानमन्त्री-वरिष्ठ भाजपा-नेता नरेन्द्रमोदी अद्य उक्तवान् यत् शरणार्थिन: पूर्णान् संवैधानिक-अधिकारान् प्राप्स्यन्ति, किन्तु अवैध प्रवेशका: निष्कासिता: भविष्यन्ति। पश्चिम-बंगालस्य कटवा-नगरे आयोजितायां जनसभायां सम्बोधयन् श्री मोदी उक्तवान् यत् राज्ये भाजपा-प्रशासनस्य संरचनानन्तरं नागरिकता-संशोधन-अधिनियमस्य अन्तर्गतं नागरिकता-प्रदान-प्रक्रिया सर्वेषां योग्य-अभ्यर्थिनां कृते शीघ्रं क्रियते। तृणमूल-कांग्रेस-पक्षस्य आलोचनां कुर्वन् श्री मोदी उक्तवान् यत् तस्य पञ्चदश-वर्षीय-शासनं बंगाल-नागरिकानां मध्ये केवलं भयम् उत्पन्नम्।

केन्द्रीय गृहमन्त्री-वरिष्ठ-भाजपा नेता अमित शाह् अपि पश्चिमबंगे जनसभां सम्बोधितवान्। असौ प्रोक्तवान् यत् तृणमूल-कांग्रेस-पक्षस्य ‘सिण्डिकेट-राज’ इत्यनेन पश्चिम-राज्यस्य शासनं नष्टम्। ममता बैनर्जी वर्या अपि भारतीय-जनता-पक्षस्य आलोचनां कृतवती।

-----------------------------------------------

<u>ज्योतिबा-फुले</u>

भारतदेश: समाज सुधारकं तथा कार्यकर्तारं महात्मानं ज्योतिबा-फुले इत्यस्य जयन्त्यवसरे श्रद्धाञ्जलि अर्पयति। असौ सप्तविंशत्युत्तर-अष्टादश-तमे वर्षे अस्मिन्नेव दिवसे जन्म लब्धवान्। महात्मा फुले स्वपत्नी सावित्री फुले सह-स्त्री-शिक्षाया: सशक्तिकरणस्य समर्थनं कृतवान् । तया च जातिव्यवस्थाया:, अस्पृश्ताया: च उन्मूलनार्थं संघर्षं कृतवान्। राष्ट्रपति: द्रौपदी मुर्मु:, उपराष्ट्रपति: सी.पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्र मोदी, गृहमन्त्री अमितशाह:,

लोकसभाध्यक्ष: ओम बिरला च संसदि प्रेरणास्थले महात्मने ज्योतिबा-फुले इत्यस्मै द्विशत-तम-जयन्त्यवसरे पुष्पाञ्जलि: समर्पितवन्त:।

-----------------------------------------------

## दिल्ली-विद्युत्-यान-नीति:

दिल्ली-सर्वकारेणप्रवर्तमान-त्रिंशदुत्तर-द्विसहस्र-तम-अवधे: कृते विद्युत-वाहन-नीते: प्रारूप: प्रकाशित:। अस्या: नीत्या: उद्देश्य: स्वच्छ-परिवहनस्य प्रोत्साहनम् इति। त्रिंशल्लक्ष-रूप्यकात् न्यून-मूल्यस्य सर्वेषां विद्युत्-मानानांकृते मार्ग-करस्य पञ्जीकरण-शुल्कस्य च शत-प्रतिशत-मुक्ति: प्रदास्यते । त्रिंशदुत्तर-द्विसहस्रतमे वर्षे मार्च अन्तिमं दिवसं यावत् मान्या भविष्यति। अस्या: योजनाया: अन्तर्गतं विद्युत-यानानां प्रोत्साहनार्थं अधिक नवशत्-उत्तर-त्रि-सहस्राधिक-कोटि-रुप्यकाणि विनियोजितानि सन्ति।

-----------------------------------------------

## इसरो

इसरो इति भारतीय-अन्तरिक्ष-अनुसन्धन संस्था इत्यनेन गगनयान-अभियानस्य कृते द्वितीय: समन्वित-वायुपत्तन-परीक्षण: आंध्रप्रदेशस्य श्रीहरिकोटायां सफलतया सम्पन्न:। एषा प्रणाली मानव-उड्डयनकाले अन्तरिक्षयात्रिणां यत्र उपवेशनं भवति तस्य क्रू-मॉड्यूलस्य सुरक्षित-उद्धारं सुनिश्चेतुं अत्यावश्यकम् अस्ति। केन्द्रीय-मन्त्री-जितेन्द्र-सिंह: अस्य परीक्षणस्य सफलसम्पादनाय इसरो संस्थां अभिनन्दितवान्। भारतस्य प्रथमं मानव-अन्तरिक्ष-उड्डयनम् अग्रिमे वर्षे श्रीहरिकोटायां प्रक्षेपितं भविष्यति।

-----------------------------------------------

## त्रिपुरा-निर्वाचनम्

त्रिपुरा-निर्वाचनेषु जनजातीय-क्षेत्र-स्वयात्त-जनपद-परिषद: (टी.टी.ए.ए.डी.सी.) निर्वाचनस्य मतदानं श्व: भविष्यति। मतदानं प्रात: सप्तवादन: सायं चतुर्वादनपर्यन्तं भविष्यति। निर्वाचनं सप्तपञ्चाशदुत्तर-द्विशत् अधिक-एकसहस्र-मतदान केन्द्रेषु अष्टाविंशति-आसनानां कृते

भविष्यति। राज्यानिर्वाचन-आयुक्तः अनुराग-सेनः अवदत् यत् स्वच्छ, निष्पक्ष-शान्तिपूर्ण-निर्वाचनस्य सुनिश्चित्यर्थं सर्वाः आवश्यकाः उपायाः उपकल्पिताः।

---------------------------------------------

## केन्द्रीय-अन्वेषणम्-अभिकरणम्

सी.बी.आई इति केन्द्रीय-अन्वेषण-अभिकरणेन इच्छा प्रकटिता यत् आरोपी साहिल-चौहानः थाईलैण्डदेशात् सफलतया प्रत्यानीतः। आपराधिक-प्रकरणेषु साहिलः हत्या, हत्याप्रयासाः, अवैध-शस्त्र-प्रयोगः वांछितः आसीत्। सी.बी.आई. अवदत् यत् साहिलः हरियाणा-पञ्जाब-चण्डीगढ़ राज्येषु कार्यरतस्य भूप्पी-राणा-इति संघटनस्य प्रमुख-सदस्यो वर्तते। संस्थया उक्तं यत् हरियाणा-आरक्षिदलेन इत्यस्मै रेड-नोटिस इत्यपि प्रकाशितः। ह्यः दिल्ली-अन्ताराष्ट्रिय-विमानपत्तने आगतः यत्र हरियाणा आरक्षिदलेन सः निगडितः अस्ति।

---------------------------------------------

## ऋतु-विज्ञान-विभागः

भारतीय ऋतु-विज्ञान विभागेन असम-मेघालय-प्रदेशयोः श्वः विद्युत-गर्जन-समेत्य वृष्टि-प्रबल-वायोः पूर्वानुमानः अभिव्यक्तः। विभागेनोक्तं यत् कोंकण-गोवा-ओडिशा-तमिलनाडु, पुदुच्चेरी, करैकाल-प्रदेशेषु अद्य उष्ण-आर्द्र-जलवायुः भविष्यति, यदा तु ओडिशा-तटीय-आन्ध्रप्रदेश-तटीय-कर्नाटक-प्रदेशेषु च श्वः अपि स्थितयः यथावत् एव सन्धारयिष्यति। ऋतुविज्ञान-विभागानुसारं अरुणाचल-प्रदेश, आगामिषु द्वि-त्रि-दिवसेषु गर्जन-वृष्टिः संभावना प्रकटिता।

---------------------------------------------

## जयशंकरः-धीवराः

विदेश मन्त्रिणा डॉ. सुब्रमण्यम जयशंकरेण प्रोक्तं यत् त्रिशताधिक- पञ्च-चत्वारिंशत् भारतीय-धीवराः ईरान-देशात् आर्मेनिया मार्गेण सुरक्षित- रीत्या भारतं सम्प्राप्ताः। तेन सामाजिक-पटले सूचितं यत् भारतीय धीवराणां ईरान-देशान सुरक्षित-तया निष्कासनार्थं तस्य सहयोगाय च आमीनिया-प्रशासनं प्रति आभारः प्रकटितः।

------------------------------------------------

## <u>बैडमिण्टन् स्पर्धा</u>

आयुष शेट्टी बैडमिंटन एशिया चैंपियनशिप इति स्पर्घायाः निर्णायकचक्रे प्रविष्टः। आयुषेन उपान्त्यचक्रे वर्तमान-विजेता कुनलावुत वितिदसर्न इत्यसौ पराजितः। निर्णायक-स्पर्धायाम् आयुषः द्वितीयेन उपान्त्यचक्रीय-विजेत्रा सह क्रीडिष्यति। अपरा उपान्त्यचक्रीया स्पर्धा अपि अद्यैव भविष्यति।

------------------------------------------------

## <u>आई पी एल क्रिकेट</u>

आई पी एल क्रिकेट स्पर्धा मालिकायाम् अद्य पंजाब किंग्स सनराइजर्स हैदराबाद दलयोः स्पर्धा मध्याह्ने क्रीडिता। अस्यां स्पर्धायां ........... दलेन ......... दलं पराजितम्। एका अन्या स्पर्धा सायं सार्क सप्त वादने भविष्यति यत्र चेन्नई सुपर किंग्स दलं डेल्ही कैपिटल्स दलं सम्मुखी-करिष्यति।

।। इति वार्ता: ।।